भिषेकश्च यादवाश्वासनं तथा। प्रत्यागतिर्गुरुकुलाद्ययोक्ता रामकृष्णयोः। मथुरायाश्चोपरोधो जरासन्धनिवर्त्तनम्। विकद्रुवाक्यं रामस्य दर्शनं भाषणं तथा। गोमन्तारोहणञ्चापि जरासन्धगतिस्तथा। गोमन्तस्य गिरेर्दाहः करवीरपुरे गतिः। शृगालस्य बधस्तत्र मथुरागमनं ततः। यमुनाकर्षणञ्चैव मथुरापक्रमस्तथा। उपायेन बधः कालयवनस्य प्रकीर्त्तितः। निर्म्माणं द्वारवत्यास्तु रुक्मिणीहरणं तथा। विवाहश्चैव रुक्मिण्या रुक्मिणो निधनं तथा। बलदेवाह्निकं पुण्यं बलमाहात्म्यमेव च। नरकस्य बधः पारिजातस्य हरणं तथा। निकुम्भस्य बधाख्यानं प्रपञ्चेनैव कीर्त्तितम्। प्रभावत्याश्च हरणं वज्रनाभबधस्तथा। द्वारवत्या विशेषेण पुनर्निर्म्माणकीर्त्तनम्। द्वारकायां प्रवेशश्च सभायाश्च प्रवेशनम्। नारदस्य च वाक्यानि वृष्णिवंशानुकीर्त्तनम्। षट्पुरस्य बधाख्यानमन्धकस्य निबर्हणम्। समुद्रयात्रा कृष्णस्य जलक्रीड़ाकुतूहलम्। तथा भैमप्रवीराणां मधुपानप्रवर्त्तनम्। ततश्छालिक्यगान्धर्वसमुदाहरणं हरेः। भानोश्च दुहितुर्भानुमत्या हरणकीर्त्तनम्। शम्बरस्य बधश्चैव धन्योपाख्यानमेव च। वासुदेवस्य माहात्म्यं बाणयुद्धं प्रपञ्चितम्। भविष्यं पुष्करञ्चैव प्रपञ्चेनैव कीर्त्तितम्। वाराहं नारसिंहञ्च वामनं बहुविस्तरम्। कैलासयात्रा कृष्णस्य पौण्ड्रकस्य बधस्ततः। हंसस्य डिम्भकस्यैव बधश्चैव प्रकीर्त्तितः। पुरत्रयस्य संहार इति वृत्तान्तसंग्रहः। कथितो नृपशार्दूल! सर्वपापप्रणाशनः। वृत्तान्तं शृणुयाद्यस्तु सायं प्रातः समाहितः। स याति वैष्णवं धाम लब्धकामः कुरूद्वह!। धन्यं यशस्यमायुष्यं भुक्तिमुक्तिफलप्रदम्”।

**हरिवल्लभा** स्त्री। १जयायां २तुलस्यां राजनि० ३लक्ष्म्याञ्च।

**हरिवात्** पु० हरिणा कोटरेण उच्चैःश्रवसा वाति गच्छति वा-शतृ। इन्द्रे हलायुधः।

**हरिवर्ष** न० हरिनामकं वर्षम्। जम्बुद्वीपस्य नववर्षमध्ये वर्षभेदे त्रिका०।

“एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयोऽयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम्” भाग ५स्क०१६अ०

**हरिवासर** न० हरिप्रियं वासरम्। १एकादशीदिवसे २द्वादशीप्रथमपादे च। “अश्वमाश्रित्य पापानि तिष्ठन्ति हरिवासरे” इति। “द्वादश्याः प्रथमः पादो हरिवासरसंज्ञकः” इति च एकादशीतत्त्वे विष्णुधर्मो०।

**हरिवाहन** पु० हरिं वाहयति स्थानान्तरं नयति वह-णिच् ल्यु। १गरुड़े हारा०। ६त०। २हरिवाहनमप्यत्र न०।

**हरिवीज** न० हरेर्वीजमुत्पत्तिकारणत्वेनास्त्यस्य अच्। हरिताले “हरितालं हरेर्वीजं लक्ष्मीर्वीजं मनःशिला” इति वैद्यकम्।

**हरिशयन** न० हरेः शयनं निद्रा। १विष्णुनिद्रायाम्। हरेः शयनं यत्र। २तदुपलक्षिते काले। स च “मैत्राद्यपादे स्वपितीह विष्णुः” इत्युपक्रम्य “प्रबुध्यते मासचतुष्टयेन” इत्यन्तेन दर्शितः आषाढ़स्य शुक्लद्वादश्यवधिकार्त्तिकशुक्लद्वादशीपर्य्यन्तरूपो मासचतुष्टयात्मकः। उत्थानैकादशीशब्दे १०७पृ० दृश्यम्।

**हरिश्चन्द्र** पु० हरिः चन्द्र इव कर्म्म० सुट्। सूर्य्यवंश्ये त्रिशङ्कुपुत्रे नृपभेदे। ऋषिभिन्ने तु न सुट्। हरिश्चन्द्र एव।

**हरिश्चन्द्रपुर** न० ६त०। सौभनगरे त्रिका०।

**हरिषेण** पु० जिनचक्रवर्त्तिविशेषे हेमच०। हरिसुतोऽप्यत्र।

**हरिसङ्कीर्त्तन** न० हरेर्हरिनाम्नः संकीर्त्तनं कथनम्। श्रीविष्णुनामोच्चारणे “सकलं निष्फलं राजन्! हरिसङ्कीर्त्तनं विना” इति कर्म्मलोचनम्।

**हरिहय** पु० हरिनामा हरिवर्णो वा हयो यस्य। इन्द्रे अमरः “हरिं विदित्वा हरिभिश्च वाजिभिः” इति रघौ तस्य हरिवर्णतुरगत्वमुक्तम्।

**हरिहर** पु० हरियुक्तो हरः। हरिहरयोः संश्लिष्टाङ्गदेहतया स्थिते मूर्त्तिभेदे देवप्रतिमाशब्दे ३७०१ तन्मूर्त्तिलक्षणं दृश्यम्। द्व०। २शिवनारायणयोः द्वि० व०।

**हरिहरक्षेत्र** न० हरिहरयोः प्रियं क्षेत्रम्। गङ्गागण्डकीसङ्गमान्तिकदेशस्थे पाटलिपुत्रादुत्तरस्यां दिशि स्थिते तीर्थभेदे।

**हरिहरात्मक** पु० १गरुड़े २शिववृषे च शब्दर०।

**हरीतकी** न० हरिं पीतवर्णं फलद्वारा इता प्राप्ता इण-क्त संज्ञायां कन् गौरा० ङीष्। १स्वनामख्याते वृक्षे तस्याः फलम् अण् तस्य लुप्। २हरीतकीफले स्त्री अमरः। “कदाचित् कुपिता माता नोदरस्था हरीतकी” इति वैद्यकम्। चेतकीशब्दे २९६२ पृ० दृश्यम्।

**हरेणु** स्त्री हृ-एणु। १रेणुकानामगन्धद्रव्ये अमरः। २कुलस्त्रियां। ३सतीले (मटर) पु० मेदि०। स्वार्थे क तत्रैव।

**हर्त्तृ** त्रि० हृ-तृच्। १हरणकारिणि। २चौरे ३सूर्य्ये च पु०